इयम् आकाशवाणी
सम्प्रति वार्ताः श्रूयन्ताम्
प्रवाचकः – पुनीतत्रिपाठी

## अथ वार्ताः

### चतुर्थचरणीय अभियानम्

लोकसभानिर्वाचनस्य अवशिष्टचरणानां कृते प्रचाराभियानं तीव्रं जातम्। ह्यः करीमनगरलोकसभाक्षेत्रस्य वेमुलावाडायां जनसभां सम्बोधयन् प्रधानमन्त्री तथा भाजपादलस्य वरिष्ठनेता नरेन्द्रमोदी विगतदशवर्षेषु एनडीएसर्वकारस्य उपलब्धीनां श्रेयः नागरिकेभ्य : दत्तवान्। राजमपेटे सभां सम्बोधयता प्रधानमन्त्री श्रीमोदी जनान् आन्ध्रप्रदेशे ॰डबल-इञ्जिन-की-सरकार॰.इत्यनेन कष्टात् उद्धारायए समृद्धिं च आनेतुं आहूतवान्। आन्ध्रप्रदेशस्य विधाननिर्वाचनमपि अस्मिन् एव समये भविष्यति।

प्रधानमन्त्रिणा भाजपा दलस्य वरिष्ठनेत्रा च नरेन्द्रमोदिना उक्तं यत् देशः जनानां वर्णस्य आधारेण अनादरं न स्वीकरिष्यति। तेलङ्गानाराज्यस्य वारङ्गलनगरे जनसभां सम्बोधयता श्रीमोदिना पूर्वप्रधानमन्त्रिणः पी वी नरसिंहराव-वर्यस्य विषये काङ्ग्रेसदले आक्रमणं कृतम्। सः अवदत् यत् भाजपायाः नीतिः राष्ट्र प्रथममेवास्तिए सः च नीतेः कार्यं करोतिए तत्रैव काङ्ग्रेसए बीआरएस इत्यादीनां दलानाम् परिवारप्रथमनीतिः अस्ति। एषा परिवारप्रथमनीतिः एव कारणं यत् काङ्ग्रेसेन पी वी नरसिंहाराव-वर्यस्य उपेक्षाए अनादरः च कृतः । श्रीमोदिना उक्तं यत् एनडीए पी वी नरसिंहाराव वर्यस्य सम्मानं करोतिए तस्मै भारतरत्नेन पुरस्कारेण समलङ्करोति।

प्रधानमन्त्रिणा जनाह्वानं कृतम् यत् ते विकासाय मतदानं कुर्वन्तुए ये तेलङ्गाना राज्यस्य अहितं कुर्वन्ति तेषां कृते उपयुक्तं उत्तरं दातव्यम् इति। तेलङ्गाना-राज्यस्य मुख्यमन्त्रीए पीसीसी-अध्यक्षः च रेवन्त-रेड्डी- ह्यः स्वीय अरमुर- पथप्रदर्शन-समारोहे जनान् सम्बोधितवान् । सः निजामाबाद-नगरे अन्यं चापि पथ प्रदर्शनं कृतवान् । तत्रैव बीआरएस-प्रमुखः पूर्वमुख्यमन्त्री च के चन्द्रशेखररावः गतसायं नरसापुरे पथ प्रदर्शनम् आयोजितवान् । भाजपेति दलस्य वरिष्ठ नेत्रा उत्तरप्रदेशस्य मुख्यमन्त्रिणा च योगी आदित्यनाथेन कानपुरए एटाए

शाहजहांपुर मण्डलेषु च प्रचाराभियानम् सम्पादितम्। भाजपा दलस्य संघठन सचिवेन बी.एल. संतोषेण बाराबंकी - गोंडा मण्डलयोः दल पदाधिकारीभिः सह उपवेशनं विहितम्।

## वित्तायोग:

षोडशवित्तायोगेन सामान्यजनानाम्ए ऐच्छिकसङ्गठनानांए मानवानां च सन्दर्भरिक्तपदानां विषये परामर्शा: विचाराः च आमन्त्रिताः सन्ति तथा च आयोगः सामान्यदृष्टिकोणं स्वीकर्तुं शक्नोति। वित्तायोगस्य कार्येण सह प्रासंगिकं अन्यस्मिन् विषये अपि परामर्श: आमन्त्रितः भवति। 'परामर्शाह्वानम्ष इति विभागस्य अन्तर्गतं षोडश तमे वित्तआयोगस्य जालपुटेन परामर्श: प्रस्तूयते। षोडशवित्तआयोगस्य गठनं भारतसंविधानस्य प्रावधानानाम् अनुसरणं कृत्वा राष्ट्रपतिना डॉ. अरविन्द-पनगरियाः अध्यक्षत्वेन कृतम् अस्ति

## मालदीव

मालदीवस्य विदेशमन्त्री मूसा जमीरः गतसायं भारतस्य त्रिदिवसीययात्रायै नव दिल्ल्यां संप्राप्तवान्। अद्य सः विदेशमन्त्रिणा डॉ. एस जयशंकरेण सह मेलनं कृत्वा पारस्परिकहितानां द्विपक्षीयक्षेत्रीयविषयेषु चर्चां करिष्यति। विदेशमन्त्रालयेन उक्तं यत्ए मालदीवदेशः हिन्दमहासागरक्षेत्रे भारतस्य प्रमुखः समीपस्थायि अस्ति तथा च विदेशमन्त्रिणः जमीरस्य यात्रया उभयोः देशयोः द्विपक्षीयसहकार्ये इतोप्यधिकं गतिः भविष्यति।

## आई.पी.एल् क्रिकेट्

आई.पी.एल् क्रिकेट् प्रतिस्पर्धा.मालिकायाम् गतरात्रौ हैदराबादस्य राजीव-गांधी -अंताराष्ट्रिय-क्रीडांगणे सनराजइजर्स-हैदराबाद.दलेन लखनऊ-सुपर जाएंट्स दलं दशस्तोभै: पराजितम्।

**।। इति वार्ता: ।।**